द्वौ पिण्डौ निर्व्वपेत्ताभ्यां चेत्रिणे बीजिने तथा॥
कीर्त्तयेदथ चैकस्मिन् बीजिनं चेत्रिणं ततः।
मृताहनि तु कर्त्तव्यमेकोद्दिष्टं विधानतः॥
अशौचे स्वे परिक्षीणे काम्यं वै कामतस्ततः।
पूर्व्वाह्णे चैव कर्त्तव्यं श्राद्धमभ्युदयार्थिना॥
देववत् सर्व्वमेव स्यान्न वै कार्य्या तिलक्रिया।
दर्भाश्च ऋजवः कार्य्या युग्मान् वै भोजयेत्
द्विजान्॥
नान्दीमुखास्ते पितरः प्रीयन्तामिति वाचयेत्।
मातृश्राद्धन्तु पूर्वं स्यात् पितॄणां स्यादनन्तरम्॥
ततो मातामहानाञ्च वृद्धौ श्राद्धत्रयं स्मृतम्।
दैवपूर्व्वन्तु दद्याद्वै न कुर्य्यादप्रदक्षिणम्॥
प्राङ्मुखो निर्व्वपेत् पिण्डानुपवीती समाहितः।
पूर्व्वं वै मातरः पूज्या भक्त्या चैव गणेश्वरः॥
स्थण्डिलेषु पवित्रेषु प्रतिमासु द्विजातिषु।
पुष्पैर्धूपैश्च नैवेद्यैर्गन्धाद्यैर्भूषणैरपि॥
पूजयित्वा मातृगणान् कुर्य्यात् श्राद्धत्रयं बुधः।
अकृत्वा मातृयागन्तु यः श्राद्धं परिवेशयेत्।
तस्य क्रोधसमाविष्टा हिंसामिच्छन्ति मातरः॥"
इति कौर्म्मे उपविभागे २१ अध्यायः॥
मात्स्ये १६।१७।१८। अध्यायेषु चान्यत् द्रष्टव्यम्॥*॥ श्राद्धे कदलीपत्रं निषिद्धं भोजनपात्रतया। इति हेमाद्रिव्याख्या श्राद्धखण्डे॥
न जातीकुसुमानि दद्यात् न कदलीपत्रम्।
इति क्रतुवचनम्॥*॥ श्राद्धोत्तरनिषिद्धानि यथा,—
"यात्रा युद्धं नदीपारं मिथ्यालापो द्विभोजनम्।
द्यूतक्रीड़ा दिवानिद्रा श्राद्धे सप्त विवर्ज्जयेत्॥"
इति कर्म्मलोचनम्॥
स्मृतिः।
द्यूतञ्च कलहश्चैव सायंसन्ध्यां दिवाशयम्।
श्राद्धकर्त्ता च भोक्ता च पुनर्भुक्तञ्च वर्जयेत्॥"
अपि च। विष्णुपुराणम्।
"वर्ज्यानि कुर्व्वता श्राद्धं कोपोऽध्वगमनं त्वरा।
भोक्तुरप्यत्र राजेन्द्र त्रयमेतन्न शस्यते॥"
राजमार्त्तण्डे।
"पुनर्भोजनमध्वानं द्युताध्ययनमैथुनम्।
दानं प्रतिग्रहं सन्ध्यां श्राद्धं कृत्वाष्ट वर्जयेत्॥"
नव्यवर्द्धमानधृता स्मृतिः।
"पुनर्भोजनमध्वानं भाराध्ययनमैथुनम्।
दानं सन्ध्यां पुनः स्नानं श्राद्धं कृत्वाष्ट वर्जयेत्॥"
इति श्राद्धतत्त्वम्॥
अथ वैष्णवश्राद्धविधिः।
"प्राप्ते श्राद्धदिनेऽपि प्रागन्नं भागवतेऽर्पयेत्।
तच्छेषेणैव कुर्व्वीत श्राद्धं भागवतो नरः॥"
दक्ष स्मृतौ।
"गृहाग्निशिशुदेवानां यतीनां ब्रह्मचारिणाम्।
पितृपाकोन दातव्यो यावत् पिण्डान्न निर्वपेत्॥"
इति॥
"ईदृक् सामान्यवचनं विशेषवचनव्रजैः।
श्रुतिस्मृतिपुराणादिवर्त्तिभिर्व्वाध्यते ध्रुवम्॥"
तथा च पाद्मे।
"विष्णोर्निवेदितान्नेन यष्टव्यं देवतान्तरम्।
पितृभ्यश्चापि तद्देयं तदानन्त्याय कल्पते॥"
मोक्षधर्म्मे नारदोक्तौ।
"सात्वतं विधिमास्थाय प्राक् सूर्य्यमुखनिःसृतम्।
पूजयामास देवेशं तच्छेषेण पितामहान्॥"
ब्रह्माण्डपुराणे।
"यः श्राद्धकाले हरिभुक्तशेषं
ददाति भक्त्या पितृदेवतानाम्।
तेनैव पिण्डांस्तुलसीविमिश्रा-
नाकल्पकोटिं पितरः सुतृप्ताः॥"
स्कान्दे श्रीशिवोक्तौ।
"देवान् पितॄन् समुद्दिश्य यद्विष्णोर्विनिवेदितम्
तानुद्दिश्य ततः कुर्य्यात् प्रदानं तस्य चैव हि॥
प्रयान्ति तृप्तिमतुलां सोदकेन तु तेन वै।
मुकुन्दगात्रलग्नेन ब्राह्मणानां विलेपनम्॥
चन्दनेन तु पिण्डानां कर्त्तव्यं पितृतृप्तये।
देवानाञ्च पितॄणाञ्च जायते तृप्तिरक्षया॥
एवं कृते महीपाल मा भवेत् संशयः क्वचित्॥"
तत्रैव श्रीपुरोषोत्तमखण्डे।
"अन्नाद्यं श्राद्धकाले तु पतिताद्यैर्निरीक्षितम्।
तुलसीदलमिश्रेण सलिलेनाभिषिञ्चयेत्॥
तदन्नं शुद्धतामेति विष्णोर्नैवेद्यमिश्रितम्।
विष्णोर्नैवेद्यशेषन्तु तस्माद्देयं द्विजन्मना।
पिण्डे चैव विशेषेण पितॄणां तृप्तिमिच्छता॥"
तत्रैव श्रीब्रह्मनारदसंवादे।
"पितॄनुद्दिश्य यैः पूजा केशवस्य कृता नरैः।
त्यक्त्वा ते नारकीं पीड़ां मुक्तिं यान्ति महामुने॥
धन्यास्ते मानवा लोके कलिकाले विशेषतः।
ये कुर्व्वन्ति हरेर्नित्यं पित्रर्थं पूजनं मुने॥
किं दत्तैर्व्बहुभिः पिण्डैर्गयाश्राद्धादिभिर्मुने॥
यैरर्च्चितो हरिर्भक्त्या पित्रर्थञ्च दिने दिने॥
यमुद्दिश्य हरेः पूजा क्रियते मुनिपुङ्गव॥
उद्धृत्य नरकावासात्तं नयेत् परमं पदम्॥
यो ददाति हरेः स्थानं पितॄनुद्दिश्य नारद।
कर्त्तव्यं हि पितॄणां यत्तत् कृतं तेन भो द्विज॥"*
श्रुतौ च। एक एव नारायण आसीत् न ब्रह्मा नेमे द्यावापृथिव्यौ सर्व्वे देवाः सर्व्वे पितरः सर्व्वे मनुष्याः विष्णुना अशितमश्नति विष्णुना घ्रातं जिघ्रन्ति विष्णुना पीतं पिबन्ति तस्माद्विद्वांसो विष्णूपहृतं भक्षयेयुरिति। अतएवोक्तं श्रीभगवता विष्णुधर्म्मे।
"प्राणेभ्यो जुहुयादन्नं मन्निवेदितमुत्तमम्।
तृप्यन्ति सर्व्वदा प्राणा मन्निवेदितभक्षणात्॥
तस्मात् सर्व्वप्रयत्नेन प्रदेयं मन्निवेदितम्।
ममापि हृदयस्थस्य पितॄणाञ्च विशेषतः॥"
किञ्च तत्रैवान्यत्र।
भक्ष्यं भोज्यञ्च यत्किञ्चिदनिवेद्याग्रभोक्तरि।
न देयं पितृदेवेभ्यः प्रायश्चित्ती यतो भवेत्॥
सर्गादौ कथितो देवैरग्रभुक् भगवान् हरिः।
यज्ञभागभुजो देवा ततस्तेन प्रकल्पिताः॥"
इति श्रीहरिभक्तिविलासे ८ विलासः॥*॥
अथोपवासदिने श्राद्धनिषेधः। पाद्मे पुष्करखण्डम्।
"एकादश्यां यदा राम श्राद्धं नैमित्तिकं भवेत्।
तद्दिने तु परित्यज्य द्वादश्यां श्राद्धमाचरेत्॥"
तत्रैवोत्तरखण्डे।
"एकादश्यान्तु प्राप्तायां मातापित्रोर्मृतेऽहनि
द्वादश्यां तत् प्रदातव्यं नोपवासदिने क्वचित्॥
गर्हितान्नं न चाश्नन्ति पितरश्च दिवौकसः॥"
स्कान्दे।
"एकादशी यदा नित्या श्राद्धं नैमित्तिकं भवेत्
उपवासं तदा कुर्य्यात् द्वादश्यां श्राद्धमाचरेत्॥"
ब्रह्मवैवर्त्ते।
"ये कुर्व्वन्ति महीपाल श्राद्धं त्वेकादशीदिने।
त्रयस्ते नरकं यान्ति दाता भोक्ता परेतकः॥"
इति श्रीहरिभक्तिविलासे १२ विलासः॥

श्राद्धं, त्रि, (श्रद्धा अस्त्यस्येति। श्रद्धा + "प्रज्ञाश्रद्धार्च्चावृत्तिभ्यो णः।" ५।२।१०१। इति णः।) श्रद्धासमन्वितम्। इति हेमचन्द्रः॥

श्राद्धकर्त्ता, [ऋ] त्रि, (करोतीति। कृ + तृच्। श्राद्धस्य कर्त्ता।) श्राद्धकारकः। यथा,—
"श्राद्धकर्त्ता च भोक्ता च पुनर्भुक्तञ्च वर्ज्जयेत्॥"
इति श्राद्धतत्त्वम्॥

श्राद्धदेवः, पुं, (श्राद्धस्य देवः।) यमः। इत्यमरः॥ (यथा, मार्कण्डेये। ८। १५६।
"श्राद्धदेवेन कथितं विश्वामित्रस्य चेष्टितम्॥")
स तु विवस्वतः संज्ञायां पत्न्यां जातः॥ मनुभेदः। इति पुराणम्॥ (यथा, मार्कण्डेये। १०६। ४।
"मनुर्वैवस्वतो ज्येष्ठः श्राद्धदेवः प्रजापतिः।
ततो यमो यमी चैव यमलौ सम्बभूवतुः॥")

श्राद्धशाकं, क्ली, (श्राद्धे देयं शाकम्।) कालशाकम्। इति भावप्रकाशः॥

श्राद्धिकः, त्रि, (श्राद्धमनेन भुक्तमिति। श्राद्ध + "श्राद्धमनेन भुक्तमिनिठनौ।" ५। २। ८५। इति ठन्।) श्राद्धभोक्ता। इति सिद्धान्तकौमुदी॥ श्राद्धसम्बन्धिद्रव्यादि। यथा, याज्ञवल्क्यः।
"सन्ध्यागर्ज्जितनिर्घाते भूकम्पोल्कानिपातने।
समाप्य वेदं द्युनिशमारण्यकमधीत्य च॥
पञ्चदश्यां चतुर्द्दश्यामष्टम्यां राहुसूतके।
ऋतुसन्धिषु भुक्त्वा वा श्राद्धिकं प्रतिगृह्य च॥"
इति तिथ्यादितत्त्वम्॥

श्राद्धी, [न्] त्रि, श्राद्धभोक्ता। श्राद्ध + "श्राद्धमनेन भुक्तमिनिठनौ।" ५। २। ८५। इति सूत्रेण इनिः। इति सिद्धान्तकौमुदी॥

श्रान्तः, पुं, (श्रम + क्तः।) शान्तः। जितेन्द्रियः। इति हेमचन्द्रः॥ श्रमयुक्ते, त्रि। श्रम तपःखेदयोः इत्यस्मात् क्तप्रत्ययेन निष्पन्नः। यथा,—
"सखि मन्नाथनाथस्तु साधयन्ती निरन्तरम्।
अतिश्रान्तासि सद्भावस्नेहयोरियमौचिती॥"
इति काव्यचन्द्रिका॥